दृढ़नीरः, पुं, (दृढ़ं प्रचुरं नीरं यस्मिन्निति ।) नारिकेलवृक्षः । इति राजनिर्घण्टः ॥

दृढ़पत्रः, पुं, (दृढ़ानि कठिनानि पत्राणि यस्य ।) वंशः । इति राजनिर्घण्टः ॥

दृढ़पत्री, स्त्री, (दृढ़ानि पत्राणि यस्याः । गौरादित्वात् ङीष् ।) वल्वजा । इति राजनिर्घण्टः ॥

दृढ़पादा, स्त्री, (दृढ़ः पादो मूलं यस्याः ।) यवतिक्ता । इति राजनिर्घण्टः ॥

दृढ़पादी, स्त्री, (दृढ़ः कठिनः पादो मूलं यस्याः ।) गौरादित्वात् ङीष् ।) भूम्यामली । इति राजनिर्घण्टः ॥

दृढ़प्ररोहः, पुं, (दृढ़ः प्ररोहोऽङ्कुरो यस्य ।) प्लक्षवृक्षः । इति राजनिर्घण्टः ॥

दृढ़फलः, पुं, (दृढ़ं कठिनं फलं यस्य ।) नारिकेलवृक्षः । इति राजनिर्घण्टः ॥

दृढ़बन्धिनी, स्त्री, (दृढ़ं यथा तथा बध्नातीति । बन्ध+णिनिः । ङीप् ।) श्यामालता । इति शब्दचन्द्रिका ॥

दृढ़मुष्टिः, पुं, (दृढ़ा मुष्टिर्धारणाय यस्य ।) खड्गादिः । (दृढ़ा दानाद्यभावात् कठिना मुष्टिर्यस्य ।) कृपणे, त्रि । इति विश्वः । टे, ६५ ॥ (दृढ़मुष्टिधारकः । यथा, हरिवंशे । २० । ६८ । "निगृहीतः कन्धरायां शिशुना दृढ़मुष्टिना ॥")

दृढ़मूलः, पुं, (दृढ़ं मूलं यस्य ।) मुञ्जतृणम् । मन्थानकतृणम् । इति राजनिर्घण्टः ॥ नारिकेलः । इति शब्दार्थकल्पतरुः ॥

दृढ़रङ्गा, स्त्री, (दृढ़ः स्थिरः रङ्गो रागो यस्याः ।) स्फटी । इति राजनिर्घण्टः ॥

दृढ़लता, स्त्री, (दृढ़ा कठिना लता ।) पातालगरुड़ी । इति राजनिर्घण्टः ॥

दृढ़लोमा, [न्] पुं, (दृढ़ानि लोमानि यस्य ।) शूकरः । इति शब्दचन्द्रिका ॥ कठिनलोमयुक्ते, त्रि ॥

दृढ़वल्कलः, पुं, (दृढ़ं वल्कलं त्वग् यस्य ।) लकु..। पूगः । इति राजनिर्घण्टः ॥

दृढ़वल्का, स्त्री, (दृढ़ं वल्कं यस्याः ।) अम्बष्ठा । इति राजनिर्घण्टः ॥

दृढ़वीजः, पुं, (दृढ़ं वीजमस्य ।) चक्रमर्द्दः । वदरः । वर्व्वूरः । इति राजनिर्घण्टः ॥

दृढ़सन्धिः, त्रि, (दृढ़ः स्थूलः सन्धिर्यस्य ।) निश्छिद्रः । तत्पर्य्यायः । संहतः २ । इत्यमरः । ३ । १ । ७५ ॥

दृढ़सूत्रिका, स्त्री, (सूत्रमस्त्यस्या इति । सूत्र+ठन् । दृढ़ा कठिना सूत्रिका चेति कर्म्मधारयः ।) मूर्व्वा । इति शब्दचन्द्रिका ॥

दृढ़स्कन्धः, पुं, (दृढ़ः स्कन्धो यस्य ।) क्षीरिकावृक्षः । इति जटाधरः ॥ (दृढ़स्कन्धविशिष्टे, त्रि ॥)

दृढ़ाङ्गं, क्ली, (दृढ़ं अङ्गं यस्य । तदितरपदार्थस्य कठिनत्वात् तथात्वम् ।) हीरकम् । इति राजनिर्घण्टः ॥ (कठिनाङ्गविशिष्टे, त्रि ॥)

दृतः, त्रि, (दृ+क्तः ।) आदृतः । आदरार्थदृधातोः कर्म्मणि क्तप्रत्ययेन निष्पन्नः ॥

दृता, स्त्री, (द्रियते स्मेति । दृ+कर्म्मणि क्तः । टाप् । भिषग्भिर्बहुव्याधिप्रयोगेषु कृतादरत्वादस्याः तथात्वम् ।) जीरकः । इति शब्दचन्द्रिका ॥

दृतिः, पुं, (दृणातीति । दृ विदारे+"दृणातेर्ह्रस्वश्च ।" उणां ।४।१८३। इति तिः ह्रस्वश्च ।) चर्म्मपुटकः । अस्य पर्य्यायः । खल्लः २ । इति हेमचन्द्रः । ४ । ६१ ॥ (यथा, मनुः ।२ । ९९ । "इन्द्रियाणान्तु सर्व्वेषां यद्येकं क्षरतीन्द्रियम् । तेनास्य क्षरति प्रज्ञा दृतेः पात्रादिवोदकम् ॥") मत्स्यः । इति मेदिनी । ते, २६ ॥ (गलकम्बलः । यथा, महाभारते । १३ । ७६ । १८ ।
"सवत्सां पीवरीं दत्त्वा दृतिकण्ठामलङ्कृताम् ।
वैश्वदेवमसंवाधं स्थानं श्रेष्ठं प्रपद्यते ॥"
"दृतिकण्ठां प्रलम्बगलकम्बलाम् ।" इति तट्टीकायां नीलकण्ठः ॥ मेघः । इति निघण्टुः ।१।१०॥ यथा, ऋग्वेदे । ७ । १०३ । २ ।
"दिव्या आपो अभि यदेनमायन्
दृतिं न शुष्कं सरसी शयानम् ॥")

दृतिधारकः, पुं, (दृतिश्चर्म्मपुटकस्तदाकारं धारयतीति । धारि+"ण्वुल् तृचौ ।" ३ । १ । १३३ । इति ण्वुल् ।) वृक्षविशेषः । आकनपाता इति भाषा । तत्पर्य्यायः । आनन्दी २ मूषिकाराबूः ३ वामनः ४ । इति शब्दचन्द्रिका ॥

दृतिहरिः, पुं, (दृतिं चर्म्ममयद्रव्यं हरतीति । दृति+हृ+"हरतेर्दृतिनाथयोः पशौ ।" ३ । २ । २५ । इति इन् ।) कुक्कुरः । इति मुग्धबोधव्याकरणम् ॥

दृन्, य, हिंसा । इति मुग्धबोधटीकायां दुर्गादासः ॥

दृन्फ, प श उत्क्लेशे । इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-सेट् ।) दन्त्यवर्गतृतीयादिः । सप्तमस्वरी । प श, दृम्फति । श, दृफति चौरं राजा क्लिश्नातीत्यर्थः । ददृम्फ ददर्फ । इति दुर्गादासः ॥

दृन्भूः, स्त्री, (दृम्फतीति । दृन्फ+"अन्दूदृन्भूजम्बूकम्बूकफेलूकर्कन्धूदिधिषूः ।" उणां ।१।९५। इति कूप्रत्ययान्तो निपातितः ।) सर्पः । चक्रम् । इति मेदिनी । भे, ५ ॥ (क्वचित् दृन्फूरिति पाठोऽपि दृश्यते ॥)

दृन्भूः, पुं, (दृन्फ+कूः । निपातनात् साधुः ।) वज्रम् । सूर्य्यः । इति हेमचन्द्रः ॥ राजा । इति शब्दरत्नावली ॥ अन्तकः । इति संक्षिप्तसारे उणादिवृत्तिः ॥

दृप, कि सन्दीपने । इति कविकल्पद्रुमः ॥ (चुरां-पक्षे-भ्वां-परं-सकं-सेट् ।) कि, दर्पयति दर्पति । इति दुर्गादासः ॥

दृप, ऋ य ज इर् हर्षे । गर्व्वे । इति कविकल्पद्रुमः ॥ (दिवां-उभं-अकं-वेट् ।) ऋ, दृप्तोऽस्मि । य, दृप्यति । ज, दर्पिष्यति द्रप्स्यति । इर्, अदृपत् अद्राप्सीत् अद्राप्सीत् अदर्पीत् । इति दुर्गादासः ॥

दृप, श बाधने । इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-सेट् ।) श, दृपति दर्पिता । बाधनं विहतिः । इति दुर्गादासः ॥

दृप्तः, त्रि, (दृप्यतीति । दृप्+वर्त्तमाने कर्त्तरि क्तः ।) गर्व्वितः । इति धरणिः ॥ (यथा, महाभारते । १ । १ । १६२ ।
"यदाश्रौषं कालकेयास्ततस्ते
पौलोमानो वरदानाच्च दृप्ताः ।
देवैरजेया निर्ज्जितास्त्वर्ज्जुनेन
तदा नाशंसे विजयाय सञ्जय ! ॥")

दृप्रः, त्रि, (दृपति बाधते इति । दृप्+"स्फायितञ्चीति ।" उणां । २ । १३ । इति रक् ।) दृप्रः । इत्युणादिकोषः ॥ (बलवान् । इत्युज्ज्वलदत्तः ॥)

दृफ, प श उत्क्लेशे । इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं--सेट् ।) प श, दृम्फति । श, दृफति चौरं राजा क्लिश्नातीत्यर्थः । ददर्फ । इति दुर्गादासः ॥

दृब्धः, त्रि, (दृभ्यते ग्रथ्यते इति । दृभ+कर्म्मणि क्तः ।) ग्रथितः । इत्यमरः । ३ । १ । ८६ ॥ (दृभ+कर्त्तरि क्तः ।) भीतः । इति भयार्थदृभधातुदर्शनात् ॥

दृभ, ई कि भये । इति कविकल्पद्रुमः ॥ (चुरां-पक्षे भ्वां-अकं-सेट् ।) कि, दर्भयति दर्भति । ई, दृब्धः । रमानाथस्तु दृ भी इति धातुद्वयं मत्वा दारयति दरति भाययति भयति इत्याह । इति दुर्गादासः ।

दृभ, श ई कि गुम्फने । इति कविकल्पद्रुमः ॥ (तुदां-चुरां पक्षे भ्वां-सकं-सेट् ।) श, दृभति । ई, दृब्धः । कि, दर्भयति दर्भति । गुम्फनं ग्रन्थनम् । इति दुर्गादासः ॥

दृम्प, ञ क ङ संघाते । इति कविकल्पद्रुमः ॥ (चुरां-उभं-आत्मं च-सकं-सेट् ।) ओष्ठ्यवर्गशेषोपधः । सप्तमस्वरी । ञ क, दृम्पयति दृम्पयते । ङ, दृम्पयते । संघातो राशीकरणम् । एषः कैश्चिन्न मन्यते । इति दुर्गादासः ॥

दृम्फूः, स्त्री, (दृम्फति क्लिश्नातीति । दृन्फ+"अन्दूदृम्फूजम्बु इति ।" उणां । १ । ९५ । इति कूः । निपातनात् साधुः ।) सर्पः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

दृम्भूः, स्त्री, (दृम्फतीति+दृन्फ्+कूः । निपातनात् साधुः ।) दृन्भूः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

दृश, इर् औ प्रेक्षे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-अनिट् ।) इर्, अदर्शत् अद्राक्षीत् । औ, द्रष्टा । प्रेक्षश्चाक्षुषज्ञानम् । पश्यति चन्द्रं लोकः । ततः स ददृशे च तौ इति व्यतीहारे आत्मनेपदम् । कदा द्रक्ष्येऽहं परमेश्वरि त्रिपथगे भागरथि ! त्वं वपुरिति गणकृतानित्यत्वात् । इति दुर्गादासः ॥

दृषत्, [द्] स्त्री, (दृषत् । पृषोदरादित्वात् साधुः ।) पाषाणः । इत्यमरः । २ । ३ । ४ ॥ निष्पेषणशिलापट्टम् । इति मेदिनी । दे, ३२ ॥